PK 551
.U7
1843

Class PK551

Book .U7

1843

A. Weber
1845

Übergeschrieben die Affixe, die im Pratiśākhya x, ṽ, c, ñ, ṭ, n, p, r oder l haben, in Beziehung auf den Accent.

für Pratiśākhya x haben folgende Taddhitas: ârax, îxax, erax, xax, ṭhax, ḍhax, ḍhinux, ḍhrax, tyax, johax, yax, rax, vux, skphax. Unâdi

für Pratiśākhya ṽ haben die oxytona III,1,163 und: vañ Śâyṇ.

für Pratiśākhya c haben die kṛits: ac, athuc, âluc, ishṇuc, elimac, xurac, xtic, xnaruc, xhac, xhishṇuc, ghurac, ṭishac, ṇac, ṇvuc, ṭric, yuc, varac, vic, suc.

die taddhitas: axac, ac, aṭhac, aḍac, atasuc, anic, ayac, asic, âxinic, âc, âṭac, âminac, âlac, âluc, ic, itac, inac, imanic, iruc, ilac, îmasac, îrac, [redacted] ṭhâc, xatac, xaṭyac, xuṣṭaruc, xṛitvasuc, goyugac, goshṭhac, ghac, cphañ, cvi, jâhac, ṭac, ṭiṭac, ṭhac, ḍac, ḍatamac, ḍataruc, ḍâc, ḍâmahac, ḍimac, ḍupac, ḍulac, tailac, daghnac, dvayasac, nâṭac, paṭac, piṭac, bahuc, bhraṭac, marîsac, mâtac, mâtruc, lac, walac, viḍac, virîsac, vuc, ṣaṅxaṭac, ṣâlac, shac, shaḍgavac, shṭaruc, shṭhac, suc, skandhac; die fem.affixe câp d. i. Casaṃdhîn ayâç, îyâç d. yâç. Veda.

für Pratiśākhya ñ haben die kṛits: iñ, uxañ, xañ, xhañ, xhamuñ, xhuxañ, ghañ, ñyuṭ, vuñ

und die taddhitas: añ, âhañ, iñ, ixañ, uxañ, cphañ (für kṣiṃdhi etc. c im Accent), ña, ñîṭha, ñya, ñyaṅg, ñyaṭ, ṭhañ, ḍhuxañ, ḍhañ, dhamuñ, dhyamuñ, nâñ, johañ, phiñ, yañ, vuñ, shyañ, shlañ, snañ.

für Pratiśākhya ṭ haben die kṛits: ñyaṭ, tavyaṭ, yaṭ

und die taddhitas aṭ, ḍyaṭ, ṇyaṭ, yaṭ, vyaṭ.

für Pratiśākhya ṅ haben die kṛits: aṭṛin, adhyain, asun, asen, in, ṛin, xadhyain, xan, xasun, xasen, xin, xen, xtin, xthan, xyun, xrin, xruxan, xlaxan, xvin, xvun, xsaxan, xhyun, ghan, ḍumsan, ṇvin, tavaṅ, tun, tumun, ṭrin, tosan, tran, twan, thaxan, nan, man, vun, ṣadhyain, shâxan, shṭran, shvun, saxan, sen,

und die taddhitas: an, âraxan, ixan, uxan, ishthan, ûgasun, xan, ṭithan, than, ḍrun, tixan, tyaxan, thyan, phin, bhaginan, yan, van, vyan, shixan, shxan, shthan, sadhinan d. i. Femin. ñîn.

für Pratiśākhya p haben die kṛits: ap, imap, xap, xyap, xvanip, xvarap, xvip, ñvanip, ḍavatup

und die taddhitas ap, enap, xap, xalpap, xaṇap, caṇap, câp, canvap, ḍnatup, tarap, tap, tamap, tayap,

WEBER COLLECTION.

tarap, tnap, tyap, pâçap, matup, map, yap, rûpap, vatup, vanip u. s. fem. aff. âgîp, câp (hier gilt aber s. Acc. nonc.) ṭâp u. ḍâp.

Ein stummes r (π, 1, 207 Paroxytonon) haben die kṛits: anîyar, kelimar

die taddhitas jâtîyar, deçîyar, u. d. Casus endg. ayâr in d. Veden.

Ein stummes l (proz. paroxytona π, 1, 193 unmittelbar vor d. Affix) haben die kṛits: kamul, khal, ṇamul, ṇvul, lyu, lyuṭ. lyuṇ Sâyâ 32, 3.

die taddhitas: ṭyul, tal, tasil, tâtil, til, tral, thâl, bhaktal, yal, ril, rishṭâtil, rhil, vidhal, sthal

u. d. Casus endg. âl in den Veden.

Lagh 1 230 Ball. naptṛâdigrahaṇam vyutpattipaksha nirṇamârtham, tene'ha na: pitâ

in 6, 4, 11 sind naptṛi etc. einzeln aufgeführt, damit diese Regel nicht auch für die andern in Uṇ 2, 91 aufgezählten Wörter interpretiren wird; also direkte Beweis für die Existenz von Uṇ 2, 91 als Vorlage Pâṇini's.

DIE UṆÂDI-AFFIXE.

HERAUSGEGEBEN UND MIT ANMERKUNGEN UND VERSCHIEDENEN INDICES VERSEHEN

VON

OTTO BOEHTLINGK.

(Gelesen den 1 December 1843.)

VORWORT.

Ich habe schon in der Einleitung zu meiner Ausgabe des Pâṇini, S. XXI. bemerkt, dass eine Lehre von den *Uṇâdi*-Affixen schon vor der Zeit des eben genannten Grammatikers bearbeitet gewesen sein müsse, da er sich darauf beziehe. Bei derselben Gelegenheit erwähnte ich auch, dass eine aus 5 Abschnitten oder *Pâda's* bestehende Sammlung von *Uṇâdi*-Affixen der *Siddhânta-Kaumudî* einverleibt sei. Ueber das Alter dieser *Pan'k'apâdî* wage ich jetzt ebenso wenig wie damals Etwas zu bestimmen.

PK551 .U7 1843 p378-410

Den hier aus der *Calcuttaer* Ausgabe der *Siddhânta-Kaumudî* mit einigen Verbesserungen, die in den Anmerkungen angegeben sind, wieder abgedruckten Text werden wohl nur diejenigen bisweilen zu Rathe ziehen, welche sich ernstlicher mit dem Studium der indischen Grammatiker abgeben; das beigegebene Verzeichniss der erklärten Wörter dagegen wird vielleicht Mehreren willkommen sein, da es uns mit der Betonung einer nicht unbedeutenden Anzahl von neuen Wörtern bekannt macht. Bei der Setzung des Accents sind folgende Regeln Pâṇini's berücksichtigt worden: III. 1. 3, 4. — VI. 1. 185, 193, 197, 217.

In den Scholien zum *Bhatti-Kâvja* habe ich zwei *Unâdi-Sûtra's* erwähnt gefunden, die in unserer *Pañ'kapâdî* vermisst werden. Das erste lautet: सचेरिवन्, das zweite नयतेरा च. Nach jenem *Sûtra* wird सचिव gebildet, dieses, das auf III. 62. folgen soll, erklärt das Wort नासा. Fernere Ergänzungen und Verbesserungen werden wir vielleicht in der Folge aus den, mir nur dem Namen nach bekannten *Unâdi-Kosha's* erhalten.

॥ अथोणादयः ॥

कृवापाजिमिस्वदिसाध्यशूभ्य उण् ॥ १ ॥

करोतीति कारुः शित्वी कारकश्च । आतो युक् वातीति वायुः । पायुर्गुदं । जयत्यभिभवति रोगान् जायुरौषधं । मिनोति प्रक्षिपति देहे उष्माणमिति मायुः पित्तं । स्वादुः । साध्नोति परकार्यं साधुः । अश्नुत आप्नु शीघ्रं । आप्नु व्रीहिः पाटलः स्यात्

छन्दसीणः ॥ २ ॥

मा न आयौ ।

दृसनिजनिचरिचटिभ्यो जुण् ॥ ३ ॥

दीर्यत इति दारु । स्नु प्रस्थः सानुरस्त्रियां । जानुनी । इह जनिबध्योश्चेति न निषेधः । अनुबन्धद्वयसामर्थ्यात् चारु रम्यं । चारु प्रियं वाक्यं । मृगय्वादित्वात्कुप्रत्यये चार्वित्यपि ।

किंशारयोः श्रिणः ॥ ४ ॥

किं शृणोतीति किंशारुः सस्यशूकं वाणश्च । जरामेति जरायुः । गर्भाशयो जरायुः स्यात्

त्रो रश्च लः ॥ ५ ॥

तरत्यनेन वर्णा इति तालुः ।

कृके वचः कश्च ॥ ६ ॥

कृकेण गलेन वक्तीति कृकवाकुः । कृकवाकुर्मयूरे च सरटे चरणायुध इति विश्वः ।

भृमृशीतृदृचरित्सरितनिधनिमिमस्जिभ्य उः ॥ ७ ॥

भरति बिभर्ति वा भर्हर्हिर्हिश्च । म्रियन्ते ऽस्मिन्भूतानि मर्हर्निर्जलदेशः । शेते शयुरजगरः । तर्वृक्षः । चरन्ति भक्षयन्ति देवता इमामिति चरुः । त्सरुः खड्गादिमुष्टिः । तनुः स्वल्पं । स्त्रियां मूर्तिस्तनुस्तनूः । धनुः शस्त्रविशेषः । धनुर्नौ च धनुर्विदुः । धनुरिवाकाशं वक्र इति ग्रीष्मर्षः । मयुः किंनरः । मदुः पानीयकाकिकेति रभसः न्यङ्क्वादित्वात्कुत्वं । अश्वेन सस्य दः ।

अणश्च ॥ ८ ॥

लवलेशकणाणवः । चात्कटिवटिभ्यां । कटुः । वटति वदतीति वटुः ।

धान्ये नित् ॥ ९ ॥

धान्ये वाच्ये ऽण उप्रत्ययः स्यात् स च नित् नित्वादाद्युदात्तः। प्रियङ्गवश्चाणवश्च व्रीहिभेदस्त्वणुः पुमान् निद्ग्रहणं फलिपाटीत्यादिसूत्रमभिव्याप्य संबध्यते ।

शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च ॥ १० ॥

शृणातीति शरुरायुधकोपयोः । स्वरुर्वज्रं । स्नैहुर्व्याधिः । चन्द्र इत्यन्ये । त्रपु सीसं । पुंसि भूम्न्यसवः प्राणाः । वसुर्ह्रदे ऽग्नौ योक्त्रे ऽशौ वसु तोये धने मणौ । हनुर्वक्त्रैकदेशः । क्लेदुश्चन्द्रः । वन्धुः । मनुः । चाद्विदि अवयवे । विन्दुः ।

स्यन्देः संप्रसारणं धश्च ॥ ११ ॥

देशे नदविशेषे ऽब्धौ सिन्धुर्ना सरिति स्त्रियामित्यमरः ।

उन्देरिच्चादेः ॥ १२ ॥

उनत्ति इन्दुः ।

ईषेः किच्च ॥ १३ ॥

ईषेरुः स्यात् स च कित् आदेरिकारादेशश्च । ईषते हिनस्ति इषुः शरः । इषुर्द्वयोः ।

स्कन्देः सलोपश्च ॥ १४ ॥

कन्दुः ।

सृजे र सुश्च ॥ १५ ॥

चात्सलोप उप्रत्ययश्च । रज्जुः ।

कृतेराद्यन्तविपर्ययश्च ॥ १६ ॥

ककारतकारयोर्विनिमयः । तर्कुः सूत्रवेष्टनं ।

नावञ्चेः ॥ १७ ॥

न्यङ्क्वादित्वात्कुत्वं । नियतमञ्चति न्यङ्कुर्मृगः ।

फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च ॥ १८ ॥

फलेर्गुक् फल्गुः । पाटेः पटिः । पाटयतीति पटुः । नम्यते ऽनेन नाकुर्वल्मीकं । मन्यत इति मधु । जायत इति जतु ।

वल्गेर्गुक्च ॥ १६ ॥

वल संवरणे । वल्गुः ।

शः कित्सन्वच्च ॥ २० ॥

श्यतेरुः स्यात् स च कित् सन्वच्च । शिश्रुर्बालः ।

यो द्वे च ॥ २१ ॥

ययुरश्वो ऽश्वमेधीयः । सन्वदिति प्रकृते द्वेयक्णमिन्वनिवृत्त्यर्थं ।

कुर्वश्च ॥ २२ ॥

बभ्रुर्नुन्यन्तरे विष्णौ बभ्रू नकुलपिङ्गलौ । चादन्यतो ऽपि । चक्रुः कर्ता । जघ्रुर्हन्ता । पपुः पालकः ।

पृभिदिव्यधिगृधिधृषिभ्यः ॥ २३ ॥

कुः स्यात् पुरुः । भिनत्ति भिदुर्वज्रं । ग्रक्ष्येति संप्रसारणं । विरक्षणं विध्यति विधुः । विधुः शशाङ्के कर्पूरे हृषीकेशे च रात्रसे । गृधुः कामः । धृषुर्दक्षः ।

कृग्रोरुच्च ॥ २४ ॥

करोतीति कुरुः । गृणाति गुरुः ।

ग्रपडुःसुषु स्थः ॥ २५ ॥

सुषामादिषु चेति षत्वं । ग्रपष्ठु प्रतिकूलं । डुष्ठु । सुष्ठु ।

रुपेरिच्चोपधायाः ॥ २६ ॥

ग्रनिष्टं रुपतीति रिपुः ।

ग्रर्तिदृशिकन्यमिपशिवाधामृजिपाशितुक्धुकूदीर्घकाराश्च ॥ २७ ॥

ग्रर्तयति गुणानृतुः । सर्वानविशेषेण पश्यतीति पशुः । कतुः । ग्रन्धुः कूपः । पांशुर्ना न द्वयोरजः । तालव्या ग्रपि दन्त्याश्च सम्वसूकरपांसवः । बाधत इति बाडः स्त्रीपुंसयोर्भुजः ।

प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ॥ २८ ॥

त्रयाणां कुः संप्रसारणं । भ्रस्जेः सलोपश्च । पृथुः । मृदुः । न्यङ्क्वादित्वात्कुत्वं । भृज्जति तपसा भृगुः ।

लङ्विबंध्योर्नलोपश्च ॥ २९ ॥

लघुः । बालमूललघ्वलमङ्गुलीनां वा लो रवमापद्यते । रघुर्नृपभेदः । बङ्गः ।

ऊर्णोतेर्नुलोपश्च ॥ ३० ॥

ऊरु सक्थि ।

महति ह्रस्वश्च ॥ ३१ ॥

उरु महत्

श्लिषेः कश्च ॥ ३२ ॥

श्लिष्यतीति श्लिकुर्मृत्यः । उच्यते ज्योतिश्च ।

आङ्परयोः खनिशृभ्यां डिच्च ॥ ३३ ॥

आखनतीत्याखुः । परं शृणातीति परशुः । पृषोदरादित्वादकारलोपात्पर्शुरपि ।

ह्वरिमितयोर्द्रुवः ॥ ३४ ॥

द्रु गतौ । अस्माद्ध्वरिमितयोरुपपदयोः कुः स च डित् ह्वरिभिर्द्रूयते ह्वरिद्रुर्वृक्षः । मितं द्रवति मितद्रुः समुद्रः ।

शते च ॥ ३५ ॥

शतधा द्रवति शतद्रुः । वाङ्मलकात्केवलादपि । द्रवतीत्यूर्ध्वमिति द्रुर्वृक्षः शाखा च । तद्वान्द्रुमः ।

खरुशङ्कुपीयुनीलङ्गुलिगु ॥ ३६ ॥

पञ्चैते कुप्रत्ययान्ता निपात्यन्ते । खनते रेफश्चान्तादेशः । खरुः कामः क्रूरो मूर्खो ऽश्वश्च । शङ्कुर्ना कीलशल्ययोः । पिबतेरिवं युगागमश्च । पीयुर्वायसः कालः सुवर्णं च । निपूर्वाल्लगि गतौ अस्मात्कुः नेर्दीर्घश्च । नीलङ्गुः क्रिमिविशेषः सृगालश्च । नीलाङ्गुरिति पाठान्तरं । तत्र धातोरपि दीर्घः । लगे सङ्गे । अस्य अत इवं च । लगतीति लिगु चित्तं । लिगुर्मूर्खः ।

मृगय्वादयश्च ॥ ३७ ॥

एते कुप्रत्ययान्ता निपात्यन्ते । मृगं यातीति मृगयुर्व्याधः । देवयुर्धार्मिकः । मित्रयुर्लोकयात्राभिज्ञः । आकृतिगणो ऽयं ।

मन्दिवाशिमथिचतिचक्ष्यङ्भ्य उरच् ॥ ३८ ॥

मन्दुरा वाजिशाला । वाशुरा रात्रिः । मथुरा । चतुरः । चङ्कुरो रथः । अङ्कुरः । खर्जूरादित्वादङ्कूरो ऽपि ।

व्यथेः संप्रसारणं किच्च ॥ ३९ ॥

विथुरश्चोररक्षसोः ।

मकुरदर्दुरौ ॥ ४० ॥

मकुरो दर्पणः । बाहुलकान्मुकुरो ऽपि । दॄ विदारणे । धातोर्द्विर्वचनमभ्यासस्य रुक् टिलोपश्च । दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः । दर्दुरा चण्डिकायां स्याद्ग्रामजाले च दर्दुरमिति विश्वः ।

मद्गुरादयश्च ॥ ४१ ॥

उरजन्ता निपात्यन्ते । माद्यतेर्गुक् मद्गुरो मत्स्यभेदः । कवृ वर्णे रुगागमः । कर्वुरः श्वेतरक्षसोः । बध्नातेः खर्जूरादित्वाद्वरो ऽपि । बन्धुरबन्धूरौ स्यातां नम्रसुन्दरयोस्त्रिष्विति रन्तिदेवः । कोकतेर्वा कुक् कुक्कुरः । कुकुरः ।

असेरुरन् ॥ ४२ ॥

असुरः । प्रज्ञाद्यण् आसुरः ।

मसेश्च ॥ ४३ ॥

पञ्चमे पादे मसेरूरन्निति वक्ष्यते । मसूरा मसुरा व्रीहिप्रभेदे पण्ययोषिति । मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः । मसूरी पादरोगे स्यादुपधाने पुनः पुमान् । मसूरमसुरौ च द्वाविति विश्वः ।

शावशेराप्तौ ॥ ४४ ॥

शु इति आश्वर्थे । श्वशुरः । पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोरित्यमरः ।

अविमह्योष्टिषच् ॥ ४५ ॥

अविषः । महिषः ।

अमेर्दीर्घश्च ॥ ४६ ॥

आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि ।

रुहेर्वृद्धिश्च ॥ ४७ ॥

रङ्कुशंवररौहिषाः । रौहिषो मृगभेदे स्माद्रौहिषं च तृणं मतमिति संसारावर्तः ।

तवेर्णिद्वा ॥ ४८ ॥

तवेति सौत्रो धातुः । तविषताविषावर्ध्यौ स्वर्गे च । स्त्रियां तविषी ताविषी नदी देवकन्या भूमिश्च । तविषी बलमिति वेदभाष्यं ।

नजि व्यधेः ॥ ४९ ॥

अव्यधिषो ऽब्धिसूर्ययोः । अव्यधिषी धराराज्योः ।

किलेर्वुक्च ॥ ५० ॥

किल्विषं ।

इषिमदिमुदिखिदिछिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिप्रुषिभ्यः किरच् ॥५१॥

इषिरो ऽग्निः । मदिरा सुरा । मुदिरः कामुकाभ्रयोरिति विश्वमेदिन्यौ । खिदिरश्चन्द्रः । छिदिरो ऽसिकुठारयोः । भिदिरं वज्रं । मन्दिरं गृहं । स्त्रियामपि । मन्दिरं मन्दिरापि स्यादिति विश्वः । चन्दिरो चन्द्रकस्तिनौ । तिमिरं तमो ऽक्षिरोगश्च । मिहिरः सूर्यः । मुहिरः काममूर्खयोः । मुचिरो दाता । रुचिरं । रुधिरं । बधिरः । प्रुष शोषणे । प्रुषिरश्छिद्रं । प्रुष्कमित्यन्ये ।

अशेर्णित् ॥ ५२ ॥

आशिरो वह्निरक्तसोः ।

अत्रिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः ॥ ५३ ॥

अत्तेर्वोभावाभावः अत्रिरङ्गणं । शशेरुपधाया इत्वं । शिशिरं स्यादृतोर्भेदे तुषारे शीतले ऽन्यवत् । श्रथ मोचने । उपधाया इत्वं रेफलोपः प्रत्ययेरेफस्य लत्वं । शिथिलं । स्थास्फायोष्टिलोपः । स्थिरं निश्चलं । स्फिरं प्रभूतं । तिष्ठतेर्वुक् ह्रस्वत्वं च । स्थविरः । खदिरः । बाऽलकात् शीङो वुक् ह्रस्वत्वं च । शिविरं ।

सलिकल्यनिमन्हिभडिभण्टशण्टपिण्टतुण्टर्कुकिभूय इलच् ॥ ५४ ॥

सलति गच्छति निम्नमिति सलिलं । कलिलं । अनिलः । मन्हिला । पृषोदरादित्वान्मेहलापि । भड इति सौत्रो धातुः । भडिलो शूरसेवकौ । भण्डिलो द्यूतः कल्याणं च । शण्टिलो मुनिः । पिण्टिलो गणकः । तुण्टिलो मुखरः । कोकिलः । भविलो भव्यः । बाऽलकात्कुटिलः ।

कमेः पश्च ॥ ५५ ॥

कम्पिलः ।

गुपादिभ्यः कित् ॥ ५६ ॥

गुपिलो राजा । तिजिलो निशाकरः । गुल्हिलं धनं ।

मिथिलादयश्च ॥ ५७ ॥

मथ्यन्ते ऽत्र रिपवो मिथिला नगरी । पथिलः पथिकः ।

पतिकठिकुटिगडिगुडिदंशिभ्य एरक् ॥ ५८ ॥

पतेः पत्नी गत्वा च । कठेः कृच्छ्रजीवी । कुटेः पर्णाशः । बाङ्गलकान्वुन्न । गडेरो मेघः ।

गुडेरो गुडकः । दंशेरो किंचः ।

कुन्वेर्नलोपश्च ॥ ५९ ॥

कुवेरः ।

शदेस्त च ॥ ६० ॥

शतेरः शत्रुः ।

मूलेरादयः ॥ ६१ ॥

एरगन्ता निपात्यन्ते । मूलेरो जटा । गुधेरो गोत्ता । गुल्हेरो लोल्घातकः । मुल्हेरो मूर्वः ।

कवेरोतच् पश्च ॥ ६२ ॥

कपोतः पत्ती ।

भातेर्डवतुप् ॥ ६३ ॥

भातीति भवान्

कठिचकिभ्यामोरन् ॥ ६४ ॥

कठोरः । चकोरः ।

किशोरादयश्च ॥ ६५ ॥

किंपूर्वस्य शृणातेरिलोपः किमो ऽत्यलोपः । किशोरो ऽश्वशावः । सल्लोरः साधुः ।

कपिगडिगण्डिकटिपटिभ्य ओलच् ॥ ६६ ॥

कपीति निर्देशान्नलोपः । कपोलः । गडोलगण्डोलौ गुडकपर्यायौ । कटोलः कटुः । पटोलः ।

मीनातेर्ऽरन् ॥ ६७ ॥

मयूरः ।

स्यन्देः संप्रसारणं च ॥ ६८ ॥

सिन्दूरं ।

सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् ॥ ६९ ॥

सिनोतीति सेतुः । तितुत्रेति नेटू तन्तुः । गन्तुः । मन्तु दधिमण्डं । सच्यत इति सक्तुः ।
अर्धर्चादिः । ज्वरत्वरेत्यूठ् तत्र किङतीत्यनुवर्तत इति मते तु बाऽलकात् श्रोतुर्विडालः ।
धातुः । क्रोष्टा ।

पः किच्च ॥ ७० ॥

पिबतीति पीतुर्वह्नौ दिवाकरे ।

अर्तेश्च तुः ॥ ७१ ॥

अर्तेस्तुः स्यात् स च कित् ऋतुः स्त्रीपुष्पकालयोः ।

कमिमनिजनिगाभायाह्निभ्यश्च ॥ ७२ ॥

एभ्यस्तुः स्यात् कन्तुः कन्दर्पचित्तयोः । मन्तुरपराधः । जन्तुः प्राणी । गातुः पुंस्कोकिले भृङ्गे
गन्धर्वे गायने ऽपि च । भातुरादित्यः । यातुरध्वकालयोः । रात्रि क्लीवे । हेतुः कारणं ।

चायः किः ॥ ७३ ॥

केतुर्ध्वजपताकयोः ।

आप्नोतेर्ह्रस्वश्च ॥ ७४ ॥

अतुः शरीरं ।

वसेस्तुन् ॥ ७५ ॥

वस्तु ।

अगारे णिच्च ॥ ७६ ॥

वेश्मभूर्वास्तुरस्त्रियां ।

कृजः कतुः ॥ ७७ ॥

क्रतुर्यज्ञः ।

ऋधिवक्योश्चतुः ॥ ७८ ॥

ऋधेर्तुः पुरुषः । वक्तुरनड्वान्

जीवेरातुः ॥ ७९ ॥

जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे ।

आतृकन्वृद्धिश्च ॥ ८० ॥

जीवेरित्येव । जैवातृकस्त्विन्दुभिषगायुष्मत्सु कृषीवले ।

कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः ॥ ८१ ॥

कर्षूः पुंसि करीषाग्नौ कर्षूर्न्यां स्त्रियां मता । चमूः । तनूः । धनूः शस्त्रं । सर्ज अर्जने ।

सर्जूर्वणिक् खर्ज व्यथने । खर्जूः पामा ।

मृजेर्गुणश्च ॥ ८२ ॥

मर्जूः शुद्धिकृत्

वहो धश्च ॥ ८३ ॥

वधूर्नायास्नुषास्त्रीषु ।

कषेश्छश्च ॥ ८४ ॥

कच्छूः पामा ।

णित्कसिपद्यर्तेः ॥ ८५ ॥

कासूः शक्तिः । पाद्मश्रणावारणी । आद्यः पिङ्गलः ।

अणो डश्च ॥ ८६ ॥

आडूर्तलम्बवद्रव्यं ।

नञ्लम्बेर्नलोपश्च ॥ ८७ ॥

तुम्ब्यलाबूरुभे समे इत्यमरः ।

के अ एरड् चास्य ॥ ८८ ॥

कशब्द उपपदे शृणातेर्डः स्याडेरेरड् आदेशः । कशेर्डस्तृणाकन्दे स्त्री । बाऽलकाडप्रत्यये कशेरुः क्लीवे पुंसि च ।

त्रो डट् च ॥ ८९ ॥

तरतेर्डः स्यात् तस्य डट् तर्दः स्याद्दारुहस्तकः ।

दरिद्रातेर्यालोपश्च ॥ ९० ॥

इश्च आश्च यौ । तयोर्लोपः । दर्दूः कुष्ठप्रभेदः ।

नृतिप्रथ्योः कूः ॥ ९१ ॥

नृतूर्नर्तकः । प्रथूरुपानं ।

ऋतेरम्च ॥ ९२ ॥

ऋदिति सौत्रो धातुः । ततः कूः । अमागमश्च । ऋतूर्देवनदो सत्यवाक्च ।

अन्दूदम्भूतम्बूकफेलूकर्कन्धूदिधिषूः ॥ ९३ ॥

एते कूप्रत्ययान्ता निपात्यन्ते । अन्दूर्बन्धनं । दृभी ग्रन्थे । निपातनान्नुम् दृम्भूः । अनुस्वाराभावो ऽपि निपातनादित्येके । दृन्भूः । ज्ञनेर्बुक् । जम्बूः । जम्यदने ऽस्येत्येके । बाङ्लकाङ्स्वो ऽपि जम्बुः । कफं लाति कफेलूः श्लेष्मातकः । निपातनादेवं । कर्कं दधाति कर्कन्धूर्वदरी । निपातनान्नुम् दिधिं धैर्यं स्यति त्यजतीति दिधिषूः पुनर्भूः । केचित्तु अन्दूदम्फूजम्बूकम्बू इति पठन्ति । दम्फ उत्क्लेशे । दम्फूः सर्पजातिः । कमेर्बुक् कम्बूः परद्रव्यापहारी ।

मृग्रोरुतिः ॥ ९४ ॥

मरुत् गरुत्पक्षः ।

ग्रो मुट् च ॥ ९५ ॥

गिरतेरुतिस्तस्य च मुट् गर्मुत्सुवर्णं तृणविशेषश्च ।

कृषेरुलच् ॥ ९६ ॥

कर्षुलो मृगकामिनोः । बाङ्लकाच्चटतेः । चटुलं शोभनं ।

कृसृरुह्यिषिभ्य इतिः ॥ ९७ ॥

कृरित्कुकुभि वर्णे च तृणवाद्यविशेषयोः । सरित्नदी । रोहिन्मृगविशेषस्य स्त्री । युष इति सौत्रो धातुः । मत्स्यस्य रोहित् पुरुषस्य योषिदिति भाष्यं ।

ताटेर्णिलुक्च ॥ ९८ ॥

ताडयतीति तडित्

शमेर्ठः ॥ ९९ ॥

बाङ्लकादित्संज्ञा एयादेश इट् च न । शण्ठः स्यात्पुंसि गोपतौ क्लीवः ।

कमेरठः ॥ १०० ॥

कमठः । कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकमिति मेदिनी । बाङ्लकाज्ञारठः ।

रमेर्वृद्धिश्च ॥ १०१ ॥

रामठं हिङ्गु ।

शमेः खः ॥ १०२ ॥

शङ्खः ।

कणेष्ठः ॥ १०३ ॥

कण्ठः ।

कलस्तृपश्च ॥ १०४ ॥

तृपतेः कलप्रत्ययः चात्तृफतेः । तृपला लता । तृफला तृफलं त्रिके ।

शपेर्वश्च ॥ १०५ ॥

शबलः ।

वृषादिभ्यश्चित् ॥ १०६ ॥

वृषलः । पललं । वाङ्लकाह्वणः । सरलः । तरलः । कमेर्बुक् । कम्बलः । मुस खण्डने । मुसलं ।

लङ्गेर्वृद्धिश्च ॥ १०७ ॥

लाङ्गलं ।

कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् ॥ १०८ ॥

कुट्मलः । कुडेरपि । कुड्मलः । कश्मलं । बाङ्लकाह्वणः । कोमलं ।

मृतेष्टिलोपश्च ॥ १०९ ॥

मलं ।

चुपेश्चोपधायाः ॥ ११० ॥

चपलं ।

शकिशम्योर्नित् ॥ १११ ॥

शकलं । शमलं ।

ह्रो गुङ्ह्रस्वश्च ॥ ११२ ॥

ह्रगलः । प्रज्ञादित्वाच्छागलः ।

जमत्ताट्टः ॥ ११३ ॥

दृणटः । रणटा । खणटः । मणटः । वणटश्छिन्नकस्तः । व्रणटः । बाङ्लकात्सत्वाभावः । षणटः संघातः । तालव्यादित्यपरे । शणटः । गणटः । चणटः । पणटः क्लीवः । पणटा बुद्धिः ।

ङ्यादिभ्यः कित् ॥ ११४ ॥

कवर्गादिभ्यो डः कित्स्यात् कुडि कुणडं । गुङ् गुडः । घुण भ्रमणे । घुणडो भ्रमरः ।

स्थाचतिमृतेरालच्वालजालीयचः ॥ ११५ ॥

तिष्ठतेरालच् स्थालं । स्थाली । चतेर्वालज् चात्वालः । मृतेरालीयच् मार्त्तालीयो विडालः ।

पतिचण्डिभ्यामालज् ॥ ११६ ॥

पातालं । चण्डालः । प्रज्ञादित्वादणि चाण्डालो ऽपीत्येके ।

तमिविशिविडिमृणिकुलिकपिपलिपच्चिभ्यः कालन् ॥ ११७ ॥

तमालः । विशालः । विडालः । मृणालं । कुलालः । कपालं । पलालं । पच्चालाः ।

पतेरङ्गच् पत्तिणि ॥ ११८ ॥

पतङ्गः ।

तरत्यादिभ्यश्च ॥ ११९ ॥

तरङ्गः । लवङ्गं ।

विडादिभ्यः कित् ॥ १२० ॥

विडङ्गः । मृदङ्गः । कुरङ्गः । बाङ्लकाडुवं च ।

सृवृजोर्वृद्धिश्च ॥ १२१ ॥

सारङ्गः । वारङ्गः खड्गादिमुष्टिः ।

गन्गम्यद्योः ॥ १२२ ॥

गङ्गा । अद्गः पुरोडाशः ।

छापूखडिभ्यः कित् ॥ १२३ ॥

छागः । पूगः । खड्गः । बाहुलकात् षिट् अनादरे गन्सत्वाभावश्च । षिड्गः तरलः । षिड्गैरगद्यत ससंभ्रममेवमेकेति माघः ।

भृञः कित् नुट् च ॥ १२४ ॥

भृञो गन् कित्स्यात् तस्य नुट् च । भृङ्गाः षिड्गालिधूम्याटाः ।

शृणातेर्ह्रस्वश्च ॥ १२५ ॥

शृङ्गं ।

गण् शकुनौ ॥ १२६ ॥

नुट् चेत्यनुवर्तते । शार्ङ्गः ।

मुदिग्रोर्गग्गौ ॥ १२७ ॥

मुद्गः । गर्गः ।

अण्डन् कृसृभृवृञः ॥ १२८ ॥

करण्डः । सरण्डःपक्षी । भरण्डः स्वामी । वरण्डो मुखरोगः ।

शॄदॄभसो ऽदिः ॥ १२९ ॥

शरत् दरद्धृदयकूलयोः । भसज्जघनं । दृणातेः षुग्ह्रस्वश्च । दृषत्

त्यजितनियजिभ्यो डित् ॥ १३० ॥

त्यद् । तद् । यद् । सर्वादयः ।

एतेस्तुट् च ॥ १३१ ॥

एतद्

सर्तेरटिः ॥ १३२ ॥

सरट् स्याद्वातमेघयोः । वेदभाष्ये तु याभिः कृशानुमितिमन्त्रे सरड्भ्यो मधुमाक्षकाभ्य इति व्याख्यातं ।

लङ्घेर्नलोपश्च ॥ १३३ ॥

लघद्वायुः ।

पारयतेरञ्जिः ॥ १३४ ॥

पारक्सुवर्णं ।

प्रथः कित्संप्रसारणं च ॥ १३५ ॥

पृथक् स्वरादिपाठाद्व्ययत्वं ।

भियः षुग्घस्वश्च ॥ १३६ ॥

भिषक्

युष्यसिभ्यां मदिक् ॥ १३७ ॥

युष् सौत्रो धातुः । युष्मद् अस्मद् त्वं । अहं ।

अर्तिस्तुसुहुसृधृक्षिक्षुभायावापद्यक्षिनीभ्यो मन् ॥ १३८ ॥

रुभ्यश्चतुर्दशभ्यो मन् अर्मश्चत्रूरोगः । स्तोमः संघातः । सोमः । व्योमः । सर्मो गगनं । धर्मः । क्षेमं कुशलं । व्योमं । प्रज्ञाद्यणि व्यौमं च । भाम आदित्यः । यामः । वामः शोभनदुष्टयोः । पद्मं । यत्न पूत्तायां । यद्मो रोगराजः । नेमः ।

व्रश्चातेः सन्वद्भावलोपश्च ॥ १३९ ॥

व्रिक्षः कुटिलमन्द्योः ।

अवतेष्टिलोपश्च ॥ १४० ॥

मन्प्रत्ययस्यायं टिलोपः । न प्रकृतेः । अन्यथा डिदित्येव ब्रूयात् ज्वरत्वरेति ऊठौ । तयोर्दीर्घे कृते गुणः । चादिपाठाद्व्ययत्वमित्युज्ज्वलदत्तः । तन्न तेषामसत्त्वार्थत्वात् वस्तुतस्तु स्वरादिपाठाद्व्ययत्वं । अवतीति ओं ।

यसेरा च ॥ १४१ ॥

यामः ।

अविसिविसिशुषिभ्यः कित् ॥ १४२ ॥

ऊमं नगरं । स्यूमो रश्मिः । सिमः सर्वः । शुष्मशुभ्रसमोपयोः ।

इषियुधीन्धिदसिश्याधूसूभ्यो मक् ॥ १४३ ॥

इष्मः कामवसन्तयोः । ईषीति पाठे दीर्घादिः । युध्मः शूरो योद्धा च । इध्मः समित् दस्मो यजमानः । श्यामः । धूमः । सूमो ऽन्तरिक्षं । वाङ्मलकादीर्घं व्रणः ।

युजिरुचितिजां कुश्च ॥ १४४ ॥

युग्मं । रुक्मं । तिग्मं ।

क्नेर्ह्रि च ॥ १४५ ॥

ह्रिमं ।

भियः षुग्वा ॥ १४६ ॥

भीमः । भीष्मः ।

घर्मः ॥ १४७ ॥

घृधातोर्मगुणश्च निपात्यते ।

ग्रीष्मः ॥ १४८ ॥

ग्रसतेर्निपातो ऽयं ।

प्रथेः षिवन्संप्रसारणं च ॥ १४९ ॥

पृथिवी । षवन्नित्येके । पृथ्वी पृथिवी पृथ्वो इति शब्दार्णवः ।

अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् ॥ १५० ॥

अश्वः । प्रुष स्नेहनादौ । प्रुष्वः स्यादतुसूर्ययोः । प्रुष्वा जलकणिका । लट्वा पक्षिभेदः फलं च । कण्वं पापं । वाङ्मलकादिर्वे किण्वमयि । खट्वा । विश्वं ।

इणशीभ्यां वन् ॥ १५१ ॥

एवो गन्ता एव एवा महतः । असत्वे निपातो ऽयं । शेवं मित्राय वरुणाय ।

सर्वनिघृघरिधिलघशिवपदप्रहेधा अतत्वे ॥ १५२ ॥

अकर्तर्येते निपात्यन्ते । सृतमनेन विश्वमिति सर्वं । निपूर्वाद्धृषेर्गुणाभावो ऽपि । निघृष्यते ऽनेन निघृष्वः खुरः । रिधो हिंस्रः । लघो नर्तकः । लिघ इत्यन्ये । तत्रोधाया इत्वमपि । शेते ऽस्मिन्सर्वमिति शिवः शम्भुः । शीङो ह्रस्वत्वं । पद्यो स्थो भूलोकश्च । प्रच्छ्यत इति प्रच्छः ।

ह्वेञ आकारवकारलोपः । ज्रह्वतेरालोपो वा । ईषेर्वन् ईष्व आचार्यः । इष्य इत्यन्ये । अतन्त्रे किं । सर्ता सारकः । वाङ्मलकाङ्क्षतेः । ह्रस्वः ।

शेवृयह्वज्रिह्वायीवाव्वामीवाः ॥ १५३ ॥

शेव इत्यत्तोदात्तार्थं । यात्यनेन यह्वः । ह्रस्वो ङगागमश्च । लिह्त्यनया जिह्वा । लकारस्य जः गुणाभावश्च । गिरत्यनया ग्रीवा । ईडागमश्च । आप्नोतीत्याव्वा वायुः । मीवा उदरक्रिमिः । वायुरित्यन्ये ।

कृगृशृदृभ्यो वः ॥ १५४ ॥

कर्वः काम आखुश्च । गर्वः । शर्वः । दर्वी राक्षसः ।

कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः ॥ १५५ ॥

यौतीति युवा । वृषा इन्द्रः । तक्षा । राज्ञा । धन्वा मरुः । धन्वा शरासनं । द्युवा सूर्यः । प्रति दीव्यत्यस्मिन् प्रतिदिवा दिवसः ।

सव्यशूभ्यां तुट् च ॥ १५६ ॥

सत । अष्ट ।

नञि ज्रहातेः ॥ १५७ ॥

अरुः ।

श्वन्नुक्षन्पूषन्प्लीहन्क्लोदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति ॥ १५८ ॥

एते त्रयोदश कनिन्नन्ता निपात्यन्ते । श्वयतीति श्वा । उक्षा । पूषा । प्लिह गतौ । इकारस्य दीर्घत्वं । प्लेहतीति प्लीहा कुक्षिव्याधिः । क्लिद्र आर्द्रीभावे । क्लिद्यति क्लोदा चन्द्रः । स्निह्य तेर्गुणः । स्निह्यतीति स्नेहा सुहृच्चन्द्रश्च । मुह्यत्यस्मिन्नाहते मूर्धा । मुहेरुपधाया दीर्घः । धो ऽन्तादेशो रमागमश्च । मज्जत्यस्थिषु मज्जा अस्थिसारः । अर्यपूर्वो माङ् अर्यमा । विश्वं प्साति विश्वप्साग्निः । परिज्ञायते परिज्मा चन्द्रो ऽग्निश्च । ज्ञेरुपधालोपो मश्चान्तादेशः । मातरि अन्तरिक्षे श्वयतीति मातरिश्वा । धातोरिकारलोपः । मह पूजायां । हस्य घो वुगागमश्च । मघवा इन्द्रः ।

॥ इत्युणादिषु प्रथमः पादः ॥

कृकृभ्यामेणुः ॥ १ ॥

कोरेणुः । हरेणुरन्धिद्रव्यं ।

हनिकुषिनीरमिकाशिभ्यः क्थन् ॥ २ ॥

हत्थो विषाणः । कुट्ठः । नीत्थो नेता । रथः । काष्ठं ।

अवे भृञः ॥ ३ ॥

अवभृथः ।

उषिकुषिगार्तिभ्यस्थन् ॥ ४ ॥

ओष्ठः । कोष्ठं । गाधा । अर्घः । बाऽलकात् शोधः ।

सर्तेर्णित् ॥ ५ ॥

सार्थः समूहः ।

तॄवृञ्भ्यामूथन् ॥ ६ ॥

तूत्थं मांसं । वत्थो रथगुप्तौ ना ।

पातृतुदिवचिरिचिसिचिभ्यन्थक् ॥ ७ ॥

पीथो रविकृतं पीथं । तीर्थं शास्त्राधरक्षेत्रोपायोपाध्यायमन्त्रिषु । अवतारर्षिनुष्टाम्भःस्त्रीरजःसु च विश्रुतमिति विश्वः । तुत्थो ऽग्निः । उक्थं सामभेदः । रिक्थं । बाऽलकादृचेरपि । रिक्थमृक्थं धनं वसु । सिक्थं ।

अर्तेर्निरि ॥ ८ ॥

निरर्थः साम ।

निशीथगोपीथावगाथाः ॥ ९ ॥

निशीथो ऽर्धरात्रः रात्रिमात्रं च । गोपीथं तीर्थं । अवगाथः प्रातः स्नातः ।

गश्योदि ॥ १० ॥

उद्गीथः साम्नो भागविशेषः ।

समीणः ॥ ११ ॥

समिथो वह्निः संग्रामश्च ।

तिथपृष्ठगूथयूथप्रोथाः ॥ १२ ॥

तिनेर्नलोपः । तिथो ऽनलः कामश्च । पृष्ठं । गूथं विष्ठा यूथं समूहः । प्रोथमस्त्री तुरङ्गास्ये प्रोथः प्रस्थित उच्यते ।

स्फायितञ्चिवञ्चिशकिभ्यां नुदिसृपितृपिदृपिवन्युन्दिग्रथितृत्यजतिमथिमदिमुदिखिदिछिदि भिदिमन्दिचन्दिदक्षिदसिदम्भिवसिवाशिशीङ्हसिसिधिभ्यो रक् ॥ १३ ॥

द्वात्रिंशद्भ्यो रकस्यात् वलि यलोपः । स्फारं । न्यङ्क्वादित्वात्कुत्वं । तक्रं । वक्रं । शक्रः । क्षिप्रं । क्षुद्रः । सृप्रश्चन्द्रः । तृप्रः पुरोडाशः । दृप्रः बलवान् वन्द्रः पूतकः । उन्दी । उद्रो जलचरः । ग्रथ्रं कुष्ठं । वृत्रो रिपौ धनौ धान्ते शैले चक्रे च दानवे । अन्तेवो । वीरः । नीरं । पद्रो ग्रामः । मद्रो हर्षः देशभेदश्च । मुद्रा प्रत्ययकारिणी । खिद्रो रोगो दरिद्रश्च । छिद्रं । भिद्रं वज्रं । मन्द्रः । चन्द्रः । पचाद्यचि चन्दो ऽपि । क्षिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्दो क्षिमद्युतिः । दक्षो ऽग्निः । दक्षः स्वर्वैद्यः । दक्षः समुद्रः स्वल्पं च । वसेः संप्रसारणे । न रपरसृपिसृजिस्पृशिस्पृक्षिसवनादीनां । रेफपरस्य सकारस्य सृप्यादीनां सवनादीनां च मूर्धन्यो न स्यात् पूर्वपदादिति प्राप्तः प्रतिषिध्यत इति वृत्तिर्भूयोऽभिप्राया । तेन शासिवसीति प्राप्तमपि न । उस्रो रश्मिः । उस्रो गौः । वास्रो दिवशः । वास्रं मन्दिरं । शीरो ऽजगरः । कस्रो मूर्खः । सिध्रः साधुः । प्रुष्रं ।

मुसे रक् ॥ १४ ॥

मुस्रं । बाऽलकात् अस्रं ।

चकिरम्योरुचोपधायाः ॥ १५ ॥

चुक्रमम्लद्रव्यं । रुस्रो ऽरुणः ।

वौ कसेः ॥ १६ ॥

विकुर्वश्चन्द्रः ।

अमितम्योर्दीर्घश्च ॥ १७ ॥

आम्रं । ताम्रं ।

निन्देर्नलोपश्च ॥ १८ ॥

निद्रा ।

ग्रहेर्दीर्घश्च ॥ १९ ॥
ग्राद्रिः ।
प्रुचेर्दश्च ॥ २० ॥
प्रूद्रः ।
डरीणो लोपश्च ॥ २१ ॥
डःखेनेयत प्राप्यत इति द्वरं ।
कृतेष्क्रू च ॥ २२ ॥
कृच्छ्रं । क्रूरः ।
रोदेर्णिलुक्च ॥ २३ ॥
रोदयतीति रुद्रः । बहुलमन्यत्रापि संज्ञाछन्दसोः । णिलुगित्येव । वान्ति पर्णप्रुषो वातास्ततः पर्णमुचो ऽपरे ।
व्रीरौ च ॥ २४ ॥
व्रीरौ ऽणुः । ज्यश्चेत्येके ।
सुसूधागृधिभ्यः क्रन् ॥ २५ ॥
सुरः । सूरः । धीरः । गृध्रः ।
प्रुसिचिमीनां दीर्घश्च ॥ २६ ॥
प्रुः सौत्रः । प्रूरः । सीरं । चीरं । मीरः समुद्रः ।
वाविन्ध्येः ॥ २७ ॥
वीध्रं विमलं ।
वृधिवपिभ्यां रन् ॥ २८ ॥
वर्ध्रं चर्म । वप्रः प्राकारः ।
क्ष्त्रेन्द्राग्रवज्रविप्रकुब्रचुब्रनुरखुरभद्रोग्रभेरभेलप्रुक्रप्रुल्लगौरश्वेतरामालाः ॥ २९ ॥
रक्ता ऊनविंशतिः । निपातनाद्गुणाभावः । क्षत्रो नायकः । इदि इन्द्रः । अङ्गर्नलोपः । ग्रयं ।
वज्रो ऽस्त्री क्लीबे पवौ । डुवप् उपधाया इत्वं । विप्रः । कुम्बिचुम्ब्योर्नलोपः । कुब्रमरण्यं । Lay 3,5

चुब्रं मुखं । क्षुर विलेखने । रेफलोपः । अगुणः । क्षुरः । खुर छेदने । रलोपो गुणाभावश्च । खुरः । भन्देर्नलोपः । भद्रं । उच समवाये । चस्य गः । उग्रः । ञिभी । भेरी । पक्षे लः । भेलो जलतरणद्रव्यं । शुचेश्चस्य कः । शुक्रः । पक्षे लः । शुक्लः । गुङ् वृद्धिः । गौरो ऽरुणे सिते पीते । वन संभक्तौ । वन्रो विभागी । इणो गुणाभावः । इरा मद्ये च वारिणि । मा माने । माला ।

समि कस उकन् ॥ ३० ॥

कस गतौ । सम्यक्कसन्ति पालयन्ते जना अस्मादिति संकसुको दुर्जनः । अस्थिरश्च ।

पचिनशोर्णुकन्कनुमौ च ॥ ३१ ॥

पचेः कः । पाकुकः सूपकारः । नशेर्नुम् । नंशुकः ।

भियः क्रुकन् ॥ ३२ ॥

भीरुकः ।

क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि ॥ ३३ ॥

रजकः । इक्षुकुट्टकः । चरकः । चष भक्षणे । चषकः । शुनकः । भषकः ।

रमे रश्च लो वा ॥ ३४ ॥

रमको विलासी । लमकः ।

जहातेर्द्वे च ॥ ३५ ॥

जह्कस्त्यागी कालश्च ।

ध्मो धम च ॥ ३६ ॥

धमकः कर्मकारः ।

हनो वध च ॥ ३७ ॥

बधकः ।

बहुलमन्यत्रापि ॥ ३८ ॥

कुह विस्मापने । कुहकः । कृतकं ।

कृषर्वृद्धिश्चोदीचां ॥ ३९ ॥

कार्षकः । कृषकः ।

ऽदकं च ॥ ४० ॥

प्रपञ्चार्थं ।

वृश्चिकृष्योः किकन् ॥ ४१ ॥

वृश्चिकः । कृषिकः ।

प्राड्डि पणिकषः ॥ ४२ ॥

प्रापणिकः पण्यविक्रयी । प्राकषिकः परदारोपजीवी ।

मुषेर्दीर्घश्च ॥ ४३ ॥

मूषिक आखुः ।

स्यमेः संप्रसारणं च ॥ ४४ ॥

चाद्दीर्घः । सीमिको वृत्तभेदः ।

क्रिय इकन् ॥ ४५ ॥

क्रयिकः क्रेता ।

आड्डि पणिपनिपतिखनिभ्यः ॥ ४६ ॥

आपणिकः । आपनिक इन्द्रनीलः किरातश्च । आपतिकः श्येनो दैवायत्तश्च । आखनिको मूषिको वराहश्च ।

श्यास्त्याहृञविभ्य इनच् ॥ ४७ ॥

श्येनः । स्त्येनः । हरिणः । अविनो ऽध्वर्युः ।

वृतेः किच्च ॥ ४८ ॥

वृत्तिनं ।

अतेरत्त च ॥ ४९ ॥

वीभावबाधनार्थं । अत्तिनं ।

बहुलमन्यत्रापि ॥ ५० ॥

कठिनं । नलिनं । मलिनं । कुण्डिनं । यतेः । यत्पहृषि दिनं । दिवसो ऽपि दिनं ।

इदन्तिभ्यामिनन् ॥ ५१ ॥

द्रविणं । दक्षिणः । दक्षिणा ।

अर्तेः किदिच्च ॥ ५२ ॥

इरिणं शून्यं ।

वेपितुह्योर्ह्रस्वश्च ॥ ५३ ॥

विपिनं । तुहिनं ।

तलिपुलिभ्यां च ॥ ५४ ॥

तलिनं । विरले स्तोके स्वच्छे ऽपि तलिनं त्रिषु । पुलिनं ।

गर्वेरत उच्च ॥ ५५ ॥

गौरादित्वान्ङीष् गुर्विणी गर्भिणी ।

रुहेश्च ॥ ५६ ॥

रोहिणः ।

महेरिनण्च ॥ ५७ ॥

चादिनन् । माहिनं । महिनं राज्यं ।

क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घो ऽसंप्रसारणं च ॥ ५८ ॥

वाक् । प्राट् । श्रीः । स्रवत्यतो घृतादिकमिति स्रूः यज्ञोपकरणं । द्रूर्हिरण्यं । कटप्रूः कामरूपी कीटश्च । जूराकाशे सरस्वत्यां पिशाच्यां जवने स्त्रियां ।

आप्नोतेर्ह्रस्वश्च ॥ ५९ ॥

आपः । अपः । अद्भिः । अद्भ्यः ।

परौ व्रजेः षश्च पदान्ते ॥ ६० ॥

व्रजेः क्विप्दीर्घौ स्तः । पदान्ते तु षश्च । परिव्राट् परिव्राजौ ।

हुवः श्लुवच्च ॥ ६१ ॥

जुह्वः ।

स्रुवः कः स्रुवश्चिक्च ॥ ६२ ॥

इकार उच्चारणार्थः । क इत् कुत्वं । स्रुक् स्रुवं स्रुचश्च संमृट्टि ।

तनोतेरनश्च वः ॥ ६३ ॥

तनोतेश्चिकप्रत्ययः । अनो वशब्दादेशश्च । वक् ।

ग्लानुदिभ्यां डौः ॥ ६४ ॥

ग्लौः । नौः । द्विरुच्चयं । डौरित्येव । ग्लौकरोति । कृन्मेजन्त इति सिद्धे नियमार्थमिदं । उणादिप्रत्ययान्तश्च्यन्त एवेति ।

रातेर्डैः ॥ ६५ ॥

राः । रायौ । रायः ।

गमेर्डौः ॥ ६६ ॥

गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः । स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्वाणलोमसु । बाऽलकात् द्युतेरपि डोः । द्यौः स्त्री स्वर्गान्तरिक्षयोः ।

भ्रमेश्च डूः ॥ ६७ ॥

भ्रूः । चाऽमेः । अग्रेगूः ।

दमेर्डोसिः ॥ ६८ ॥

दोः । दोषौ ।

पणेरिण्यादेश्च बः ॥ ६९ ॥

बणिक् स्वार्थे ऽण् नैगमो बाणिजो वणिक्

वशः कित् ॥ ७० ॥

उशिगग्नौ घृते ऽपि च ।

भृञ ऊच्च ॥ ७१ ॥

भूरिग्भूमिः ।

ञसिसक्योरुरिन् ॥ ७२ ॥

ञसुरिर्वज्रं । सञरिरादित्यः पृथिवी च ।

सुयुरुवृञो युच् ॥ ७३ ॥

सवनश्चन्द्रमाः । यवनः । रवणः कोकिलः । वरणः ।

अशे रश च ॥ ७४ ॥

अश्नोतेर्युच्स्यात् रशादेशश्च । रशना काञ्ची । जिह्वावाची तु दत्यसकारवान्

उन्देर्नलोपश्च ॥ ७५ ॥

औदनः ।

गमेर्गश्च ॥ ७६ ॥

गमेर्युच्स्याद्गश्चादेशः । गगनं । बङ्गलमन्यत्रापि युच्स्यात् स्यन्दनः । रोचना ।

रञ्जेः क्युन् ॥ ७७ ॥

रञ्जनं ।

भूसूधूभ्रस्जिभ्यश्छन्दसि ॥ ७८ ॥

भुवनं । सुवन आदित्यः । धुवनो वह्निः । निधुवनं सुरतं । भृज्जनमम्बरीषं ।

कृपृवृजिमन्दिनिधाञः क्युः ॥ ७९ ॥

किरणः । पुरणः समुद्रः । वृजनमन्तरिक्षं । मन्दनं स्तोत्रं । निधनं ।

धृषेर्धिषिः च संज्ञायां ॥ ८० ॥

धिषणो गुरुः । धिषणा धीः ।

वर्तमाने पृषद्बृहन्महज्जगच्छतृवत् ॥ ८१ ॥

अतिप्रत्ययान्ताः । पृषु सेचने । गुणाभावः । पृषन्ति । बृहत् महान् गमेर्जगादेशः । जगत्

संश्चत्तृपद्बृहत् ॥ ८२ ॥

एते निपात्यन्ते । पृथक्करणं शतृवद्भावनिवृत्त्यर्थं । संचिनोतेः सुट् इकारलोपः । सच्चत्कुलकः ।

तृपच्छत्रं । विपूर्वाद्धतेष्टिलोपः । इत ए च । वेल्लद्भीपघातिनी ।

छन्दस्यसानच्युनृभ्यां ॥ ८३ ॥

शवसानः पन्थाः । जरसानः पुरुषः ।

ऋज्रिवृधिमन्दिसहिभ्यः कित् ॥ ८४ ॥

ऋज्रसानो मेघः । वृधसानः पुरुषः । मन्दसानो ऽग्निर्वीश्च । सहसानो यज्ञो मयूरश्च ।

अर्तेर्गुणः शुट् च ॥ ८५ ॥

अर्शसानो ऽग्निः ।

सम्यानच् स्तुवः ॥ ८६ ॥

संस्तवानो वाग्मी ।

युधिबुधिदृशिभ्यः किच्च ॥ ८७ ॥

युधानः । बुधानः । दृशानो लोकपालकः ।

ऊर्छेः सँनो लुक्छलोपश्च ॥ ८८ ॥

जुहुराणश्चन्द्रमाः ।

श्वितेर्दश्च ॥ ८९ ॥

शिश्विदानः पुण्यकर्मा ।

तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ ॥ ९० ॥

शंसेः क्षदादिभ्यश्च क्रमात्तृन्तृचौ स्तः । तौ चानिटौ । शंस्ता स्तोता । शंस्तरौ । शंस्तरः । क्षदिः सौत्रो धातुः शकलीकरणे भक्षणे च अनुदात्तेत् वृक्ये चक्षदानमिति मन्त्रात् उक्षाणं वा वेहतं वा क्षदन्त इति ब्राह्मणाच्च । क्षत्ता स्यात्सारथौ द्वास्थे वैश्यायामपि शूद्रजे । बहुलमन्यत्रापि । मन् मन्ता । हन् हन्ता इत्यादि ।

नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ॥ ९१ ॥

न पतत्यनेन नप्ता पौत्रो दौहित्रश्च । नयतेः षुग्गुणश्च । नेष्टा । त्विषेरितो ऽत्वं । त्वष्टा । होता । पोता ऋत्विग्भेदः । भ्राजतेर्जलोपः । भ्राता । जायां माति जामाता । मान पूजायां नलोपः । माता । पातेरकारस्य इत्वं । पिता । दुहेस्तृच इट् गुणाभावश्च । दुहिता ।

स्वसेर्ऋन् ॥ ९२ ॥

स्वसा ।

यतेर्वृद्धिश्च ॥ ९३ ॥

याता । भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परं ।

नञि च नदेः ॥ ९४ ॥

न नन्दति ननान्दा । इह वृद्धिर्नानुवर्तत इत्येके । ननान्दा तु स्वसा पत्युर्ननन्दा नन्दिनी च सेति शब्दार्णवः ।

दिवेर्ऋः ॥ ९५ ॥

देवा । देवरः । स्वामिनो देवृदेवरौ ।

नयतेर्डिच्च ॥ ९६ ॥

ना । नरौ । नरः ।

सव्ये स्थश्छन्दसि ॥ ९७ ॥

अम्बाम्बेत्यत्र स्थास्थिन्स्थॄणामुपसंख्यानं । सव्येष्ठा सारथिः । सव्येष्ठरौ । सव्येष्ठरः ।

अर्तिसृधृधम्यम्यश्यवितॄभ्यो ऽनिः ॥ ९८ ॥

अष्टभ्यो ऽनिप्रत्ययः स्यात् अरणिरग्नेर्योनिः । सर॑णिः । धर॑णिः । धम॑निः । अम॑निर्गतिः ।

अश॑निः । अव॑निः । तर॑णिः । बाहुलकात् रज॑निः ।

आङि शुषेः सनश्छन्दसि ॥ ९९ ॥

आशुशुक्षणिरग्निर्वातश्च ।

कृषेरादेश्च चः ॥ १०० ॥

चर्षणिर्जनः ।

अदेर्मुट् च ॥ १०१ ॥

अद्मनिरग्निः ।

वृतेश्च ॥ १०२ ॥

वर्तनिः । गोवर्धनस्तु चकारान्मुटू वर्त्मनिरित्याह ।

क्षिपेः किच्च ॥ १०३ ॥

क्षिपणिरायुधं ।

अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः ॥ १०४ ॥

अर्चिर्ज्वाला । इदन्तो ऽप्ययं । अग्नेर्भ्राजन्ते ऽर्चयः । शोचिर्दीप्तिः । हविः सर्पिः । इस्मन्निति ह्रस्वः । छदिः पटलं । छर्दिर्वमनव्याधिः । इदन्तो ऽपि छर्द्यतीसारशूलवान्

वृंहेर्नलोपश्च ॥ १०५ ॥

वर्हिर्ना कुशशुष्मणोः ।

द्युतेरिसिन्नादेश्च जः ॥ १०६ ॥

द्योतिः ।

वसौ रुचेः संज्ञायां ॥ १०७ ॥

वसुरोचिर्यज्ञः ।

भुवः कित् ॥ १०८ ॥

भुर्वः समुद्रः ।

सह्वो धश्च ॥ १०९ ॥

सधिरनड्वान्

पिबतेस्थुक् ॥ ११० ॥

पाथिश्चन्तुःसमुद्रयोः ।

ज्ञनेहसिः ॥ १११ ॥

ज्ञनुर्ज्ञननं ।

मनेर्धिष्कृन्दसि ॥ ११२ ॥

मधुः ।

अर्तिपृवपियजितनिधनितपिभ्यो नित् ॥ ११३ ॥

अरुः । परुर्ग्रन्थिः । वपुः । यजुः । तनुः । तनुपी । तनूपि । धनुरस्त्रियां । धनुर्वंशविप्रुड्डो ऽपि निर्गुणः किं करिष्यति । सान्तस्य उदन्तस्य वा ह्रपं । तपुः सूर्याग्निशत्रुषु ।

एतेर्णिच्च ॥ ११४ ॥

आयुः । आयुषी ।

चदेः शिच्च ॥ ११५ ॥

चदुः ।

मुहेः किच्च ॥ ११६ ॥

मुङ्क्रव्ययं । वङ्कलनन्यत्रापि । आचन्तुः । परिचन्तुः ।

कृगृभृवृञ्चतिभ्यः ष्वरच् ॥ ११७ ॥

कर्वरी व्याघ्रस्त्रसोः । गर्वरो ऽहंकारी । शर्वरी रात्री । वर्वरः प्राकृतो जनः । चवरं ।

नौ सदेः ॥ ११८ ॥
निषद्वरस्तु ज़म्बालः । निषद्वरी रात्रिः ।

॥ इत्युणादिषु द्वितीयः पादः ॥

ह्रिवरच्छ्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकद्वरसंयद्वराः ॥ १ ॥
एकादश वरच्प्रत्ययान्ता निपात्यन्ते । ह्रिदिर् ह्रद् अनयोस्तकारान्तादेशः । ह्रिदेर्गुणाभावश्च ।
ह्रिवरो धूर्तः । ह्रवरो गृहकुञ्जयोः । धीवरः कैवर्तः । पीवरः स्थूलः । मीवरो हिंसकः ।
चिनोतेर्दीर्घश्च । चीवरं भिक्षुकप्रावरणं । तीवरो जातिविशेषः । नीवरः परिव्राट् गाहतेर्ह्रस्वत्वं ।
गह्वरं । कटे वर्षादौ । कद्वरं व्यञ्जनं । यमेर्दीर्घः । संयद्वरो नृपः । पदे संपद्वर इत्येके ।
इर्णसिजृजिदीङ्ष्यविभ्यो नक् ॥ २ ॥
इनः सूर्ये नृपे पत्यौ । सिनः काणः । जिनो ऽर्हन् दीनः । उन्नः । ऊनः ।
फेनमीनौ ॥ ३ ॥
एतौ निपात्येते । स्फायतेः फेनः । मीनः ।
कृषेर्वर्णे ॥ ४ ॥
कृष्णः ।
बन्धेर्ब्रधिबुधौ च ॥ ५ ॥
ब्रध्नः । बुध्नः ।
धापृवस्यज्यतिभ्यो नः ॥ ६ ॥
धाना भृष्टयवे स्त्रियः । पर्ण पत्रं । पर्णः किंशुकः । वस्नो मूल्ये वेतने च । अत्तेर्वो । वेनः ।
अत्र आदित्यः । बाहुलकात् प्रृणोतेः । श्रोणः पङ्गुः ।
लक्तेरट् च ॥ ७ ॥
लक्तेश्चुरादिण्यन्तान्नः स्यात् तस्याडागमश्च । चान्नुडित्येके । लक्ष्मणं लक्ष्मणा नाम्नि चिह्ने च ।
लक्ष्मणो लक्ष्मणश्च रामभ्राता । लक्ष्मणा हंसयोषायां सारसस्य च लक्ष्मणा ।
वनेरुचोपधायाः ॥ ८ ॥

वेत्रा नदी ।

सिवेष्टेर्यूं च ॥ ९ ॥

दीर्घोच्चारणसामर्थ्यान्न गुणः । स्यून आदित्यः । वाऊलकात्केवलो नः । ऊठ् अन्तरङ्गबाधेन् गुणः । स्योनः ।

कृवृतॄसिद्रुपन्यनिस्वपिभ्यो नित् ॥ १० ॥

कर्णः । वर्णः । तॄर्णश्चन्द्रे च वृत्ते च । सेना । द्रोणः । पत्नो नीचैर्गतिः । अन्नमोदनः । स्वप्नो निद्रा ।

धेट इच्च ॥ ११ ॥

धेनः सिन्धुर्नदी धेना ।

तृषिशुषिरसिभ्यः कित् ॥ १२ ॥

तृन्ना । प्रुन्नः सूर्यो वह्निश्च । रत्नं द्रव्यं ।

सुजो दीर्घश्च ॥ १३ ॥

सूना बधस्थानं ।

रमेस्त च ॥ १४ ॥

रमयतीति रत्नं ।

रात्नासात्नास्थूणावीणाः ॥ १५ ॥

रात्ना गन्धद्रव्यं । सात्ना गोगलकम्बलः । स्थूणा गृहस्तम्भः । वीणा वल्लकी ।

गादाभ्यामिन्नुच् ॥ १६ ॥

गेन्नुर्गायनः । देन्नुर्दाता ।

कृत्यप्रूभ्यां क्स्नः ॥ १७ ॥

कृत्स्नमखण्डं । अद्नं ।

तिजेर्दीर्घश्च ॥ १८ ॥

तीद्नं ।

श्लिषेश्चोपधायाः ॥ १९ ॥

श्लद्नं ।

यजिमनिप्रुन्धिदसिजनिभ्यो युच् ॥ २० ॥

यज्युरध्वर्युः । मन्युर्दैन्ये क्रतौ क्रुधि । शुन्ध्युरग्निः । दस्युस्तस्करः । जन्युः शरीरी ।

भुजिमृङ्भ्यां युक्युकौ ॥ २१ ॥

भुज्युर्भोजनं । मृत्युः ।

सर्तेरयुः ॥ २२ ॥

सरयुर्नदी । अयूरिति पाठान्तरं । सरयूः ।

पानीविषिभ्यः पः ॥ २३ ॥

पाति रक्षत्यस्मादात्मानमिति पापं । तद्योगात्पापः । नेपः पुरोहितः । बाङ्लकाद्गुणाभावे नीपो वृक्षविशेषः । वेष्पः पानीयं ।

च्युवः किच्च ॥ २४ ॥

च्युपो वक्त्रं ।

स्तुवो दीर्घश्च ॥ २५ ॥

स्तूपः समुच्छ्रायः ।

सुप्रभ्यां निच्च ॥ २६ ॥

चात्किन् सूपः । बाङ्लकाद्भवं । प्रूर्षं ।

कुयूभ्यां च ॥ २७ ॥

कुवन्ति मण्डूका अस्मिन् कूपः । युवन्ति बध्नत्यस्मिन्पशुमिति यूपो यज्ञस्तम्भः ।

खष्पशिल्पशष्पवाष्पद्रूपपर्पतल्पाः ॥ २८ ॥

सप्तैते पप्रत्ययान्ता निपात्यन्ते । खनतेर्नकारस्य षत्वं । खष्पो क्रोधबलात्कारौ । शीलतेर्ह्रस्वः । शिल्पं कौशलं । शसु हिंसायां । निपातनात्षत्वं । शष्पं बालतृणं प्रतिभानत्वयञ्च । वाधतेः षः । वाष्पो नेत्रजलोष्मणोः । वाष्पं च । रौतेर्दीर्घः । द्रूपं स्वभावे सौन्दर्ये । पृ । पर्पं गृहं बालतृणं पङ्क्तिपीठं च । तल प्रतिष्ठाकरणे । चुरादिणिचो लुक् तत्पं शय्यादारुषु ।

स्तनिकृषिपुषिगदिमदिभ्यो णेरित्नुच् ॥ २९ ॥

अयामन्तेति णेरयादेशः । स्तनयित्नुः । कर्षयित्नुः । पोषयित्नुः । गदयित्नुर्वावदूकः । मदयित्नुर्मदिरा ।

कृहनिभ्यां कनुः ॥ ३० ॥

कृनुः शिल्पी । कनुर्व्याधिः शस्त्रं च ।

गमेः सन्वच्च ॥ ३१ ॥

जिगनुः ।

दाभाभ्यां नुः ॥ ३२ ॥

दानुर्दाता । भानुः ।

वचेर्गश्च ॥ ३३ ॥

वग्नुः ।

धेट इच्च ॥ ३४ ॥

धयति तामिति धेनुः ।

सुवः कित् ॥ ३५ ॥

सूनुः पुत्रे ऽनुत्ते स्त्री ।

ञक्षातेर्द्वे ऽक्तलोपश्च ॥ ३६ ॥

जक्षुः ।

स्थो णुः ॥ ३७ ॥

स्थाणुः कीले स्थिरे क्लरे ।

अतिवृरीभ्यो निच्च ॥ ३८ ॥

अतेर्वो । वेणुः । वर्णुर्न्दिदेशभेदयोः । रेणुर्द्वयोः स्त्रियां धूलिः ।

विषेः किच्च ॥ ३९ ॥

विष्णुः ।

कृदाधारार्चिकलिभ्यः कः ॥ ४० ॥

बाऽलकान्न कल्येत्संज्ञा । कर्को धवलघोटकः । दाको दाता । धाको ऽनड्वानाधारश्च । राका पौर्णमासी । अर्कः । कल्कः पापाशये पापे दम्भे विट्किट्योरपि ।

सृवृभूशुषिमुषिभ्यः कक् ॥ ४१ ॥

सृक उत्पलवातयोः । वृकः श्वापदकाकयोः । भूकं छिद्रं । शुष्कः । मुष्को ऽण्डं ।
शुकवल्कोल्काः ॥ ४२ ॥
शुभेरत्यलोपः । शुकः । वल्कं वल्कलमस्त्रियां । उष दाहे । षस्य लः । उल्का ।
इण्भीकापाशल्यतिमर्चिभ्यः कन् ॥ ४३ ॥
एके मुख्यान्यकेवलाः । भेको मण्डूकमेघयोरिति विश्वमेदिन्यौ । काकः । पाकः शिशुः । शल्कं
शकलं । अत्कः पथिकः शरीरावयवश्च । मर्कः शरीरं वायुः ।
नौ हः ॥ ४४ ॥
जहातेः कन्स्यान्नौ । निहाका गोधिका ।
नौ सदेर्डिच्च ॥ ४५ ॥
निष्को ऽस्त्री हेम्नि तत्पले ।
स्यमेरीट् च ॥ ४६ ॥
स्यमीको वाल्मीको वृक्षभेदश्च । इट् ह्रस्व इति केचित् स्यमिकः ।
अजियुधुनीभ्यो दीर्घश्च ॥ ४७ ॥
वीकः स्याद्वातपक्षिणोः । यूका । धूको वायुः । नीको वृक्षविशेषः ।
ह्रियो रश्च लो वा ॥ ४८ ॥
ह्रीका ह्लीका त्रपा मता ।
शकेरुनोन्तोन्त्युनयः ॥ ४९ ॥
उन उन्त उन्ति उनि एते चत्वारः स्युः । शकुनः । शकुन्तः । शकुन्तिः । शकुनिः ।
भुवो क्विच् ॥ ५० ॥
भवन्तिर्वर्तमानकालः । बाहुलकादवेश्च । अवन्तिः । वदेर्वदन्तिः । किंवदन्ती जनश्रुतिः ।
कन्युच् क्षिपेश्च ॥ ५१ ॥
चाद्भुवः । क्षिपण्युर्वसन्त इत्युज्वलदत्तः । भुवन्युः स्वामिसूर्ययोः ।
अनुङ्नदेश्च ॥ ५२ ॥
चात्क्षिपेः । नदनुर्मेघः । क्षिपणुर्वातः ।

कृवृदारिभ्य उनन् ॥ ५३ ॥

करुणो वृक्षभेदः स्यात्करुणा च कृपा मता । वरुणः । दारुणं ।

त्रो रश्च लो वा ॥ ५४ ॥

तरुणस्तलुनो युवा ।

नुधिपिशिमिथिभ्यः कित् ॥ ५५ ॥

नुधुनो म्लेच्छजातिः । पिशुनः । मिथुनं ।

फलेर्गुक्च ॥ ५६ ॥

फल्गुनः पार्थः । प्रज्ञाद्यण् फाल्गुनः ।

अशेर्लशश्च ॥ ५७ ॥

लशुनं ।

अर्तेर्णिलुक्च ॥ ५८ ॥

अर्जुनः ।

तृणाख्यायां चित् ॥ ५९ ॥

चिद्वादन्तोदात्तः । अर्जुनं तृणं ।

अर्तेश्च ॥ ६० ॥

अरुणः ।

अजियमिशीङ्भ्यश्च ॥ ६१ ॥

वयुनं देवमन्दिरं । यमुना । शयुनो ऽजगरः ।

वृतृवदिह्नमिकमिकषिभ्यः सः ॥ ६२ ॥

वर्षं । तर्षः प्लवसमुद्रयोः । वत्सः । वत्सं वक्षः । हंसः । कंसो ऽस्त्री पानभाजनं । कक्षं नक्षत्रं ।

प्लुषेश्चोपधायाः ॥ ६३ ॥

प्लक्षः ।

मनेर्दीर्घश्च ॥ ६४ ॥

मांसं ।

अशेर्देवने ॥ ६५ ॥

अक्षः ।

स्नुव्रश्चिकृत्यृषिभ्यः कित् ॥ ६६ ॥

स्नुषा । वृक्षः । कृत्समुदकं । ऋक्षं नक्षत्रं । ऋषेर्जातौ । ऋक्षो ऽद्रिभेदे भल्लूक इति च ।

उन्दिगुथिकुषिभ्यश्च ॥ ६७ ॥

उत्सः प्रस्रवणं । गुत्सः स्तवकः । कुक्षो जठरं ।

गृधिपण्योर्दकौ च ॥ ६८ ॥

गृत्सः कामदेवः । पक्षः ।

अशेः सरः ॥ ६९ ॥

अक्षरं ।

वसेश्च ॥ ७० ॥

वत्सरः ।

संपूर्वाच्चित् ॥ ७१ ॥

संवत्सरः ।

कृधूमदिभ्यः कित् ॥ ७२ ॥

बाहुलकान्न षत्वं । कृसरः स्यात्तिलौदनं । धूसरः । मत्सरः । मत्सरा मक्षिका ज्ञेया भंभराली च सा मता ।

पते रश्च लः ॥ ७३ ॥

पत्सलः पन्थाः ।

तन्यृषिभ्यां क्सरन् ॥ ७४ ॥

तसरः सूत्रवेष्टने । ऋक्षर ऋत्विक्

पीयुक्वणिभ्यां कालन् ह्रस्वः संप्रसारणं च ॥ ७५ ॥

पीयुः सौत्रः । पियालो वृक्षभेदः । कुणालो देशभेदः ।

कटिकुषिभ्यां काकुः ॥ ७६ ॥

कटाकुः पत्ती । कुषाकुरग्निः सूर्यश्च ।
सर्तेर्डिकच ॥ ७७ ॥
सृदाकुर्वातसरितोः ।
वृतेर्वृङिश्च ॥ ७८ ॥
वार्ताकुः । बाऽलकाडुकारस्य अवं । वार्ताकं ।
पर्देर्नित्संप्रसारणमल्लोपश्च ॥ ७९ ॥
पृदाकुर्वृश्चिके व्याघ्रे चित्रके च सरीसृपे ।
सृयुवचिम्यो ऽन्युन्नागून्नकुचः ॥ ८० ॥
अन्युच् आगूच् अक्नुच् इते क्रमात्स्युः । सरण्युर्मेघवातयोः । यवागूः । वचक्नुर्विप्रवाग्मिनोः ।
आनकः शीङ्भियः ॥ ८१ ॥
शयानको ऽजगरः । भयानकः ।
आणाको लूधूशिन्धिधाञ्भ्यः ॥ ८२ ॥
लवाणकं दात्रं । धवाणको वातः । सिन्धाणकः श्लेष्मा । पृषोदरादित्वात्पत्ते कलोपः । सिन्धाणं
नासिकामले । धाणको दीनारभागः ।
उल्मुकदर्विह्वोमिनः ॥ ८३ ॥
उष दाहे । षस्य लः मुकप्रत्ययश्च । उल्मुको ऽलदङ्गारं । दृणातेर्विः । दर्विः । हुह्वोतेर्मिनिः ।
ह्वोमी ।
ह्रियः कुक् रश्च लो वा ॥ ८४ ॥
ह्रीकुः । ह्लीकुर्लज्जावान् ।
कसिमृग्रिण्वामिदमिलुपूधूर्विभ्यस्तन् ॥ ८५ ॥
दशभ्यस्तन् स्यात् तितुत्रेति नेट् कस्तः । मर्तः । गर्तः । शृतः कर्वुरः । वातः । अक्तः । दक्तः ।
लोतः स्यादशुचिक्लयोः । पोतो बालवहित्रयोः । धूर्तः । बाऽलकात्तुसेर्दीर्घश्च । तूस्तं पापं
धूलिर्जटा च ।
नज्याय इट् च ॥ ८६ ॥

नापितः ।

तनिमृङ्भ्यां किच्च ॥ ८७ ॥

ततं । मृतं ।

अञ्जिघृसिभ्यः क्तः ॥ ८८ ॥

अक्तं । घृतं । सितं ।

डुतनिभ्यां दीर्घश्च ॥ ८९ ॥

दूतः । तातः ।

जेर्मूट् चोदात्तः ॥ ९० ॥

जीमूतः ।

लोष्टपलितौ ॥ ९१ ॥

लुनातेः क्तः । तस्य सुट् धातोर्गुणः । लोष्टं । पलितं ।

कृश्याभ्यामितन् ॥ ९२ ॥

हरितश्येतौ वर्णभेदौ ।

रुहे श्च लो वा ॥ ९३ ॥

रोहितो मृगमत्स्ययोः । लोहितं रक्तं ।

पिशेः किच्च ॥ ९४ ॥

पिशितं मांसं ।

अदसिस्पृहिगृहिभ्य आप्यः ॥ ९५ ॥

अवाप्यो यज्ञपशुः । दत्ताप्यो गरुडो गृध्रश्च । स्पृह्याप्यः । गृह्याप्यो गृहस्वामी ।

दिधिषाप्यः ॥ ९६ ॥

दधातेर्द्विर्वचनं षुक्च । मित्र इव यो दिधिषाप्यः ।

वृञ एण्यः ॥ ९७ ॥

वरेण्यः ।

स्तुवः कसेप्यश्छन्दसि ॥ ९८ ॥

स्तुषेय्यं पुरुवर्पसं । RV 8,7,2. ṛibhvam vahamam āptyam āptyānām

राजेरन्यः ॥ ९९ ॥

राजन्यो वह्निः ।

शूरम्योश्च ॥ १०० ॥

शरण्यं । रमण्यं ।

अर्तेर्निच्च ॥ १०१ ॥

अरण्यं ।

पर्जन्यः ॥ १०२ ॥

पृषु सेचने । षस्य जः । पर्जन्यः शक्रमेघयोः ।

वदेरान्यः ॥ १०३ ॥

वदान्यस्त्यागिवाग्मिनोः ।

अमिनक्षियजिबधिपतिभ्यो ऽत्रन् ॥ १०४ ॥

अमत्रं भाजनं । नक्षत्रं । यजत्रः । बधत्रमायुधं । पतत्रं तनूरुहं ।

गडेरादेश्च कः ॥ १०५ ॥

कडत्रं । डलयोरेकत्र स्मरणात् कलत्रं ।

वृञश्चित् ॥ १०६ ॥

वरत्रा चर्ममयी रज्जुः ।

सुविदेः कत्रन् ॥ १०७ ॥

सुविदत्रं कुटुम्बकं ।

कृतेर्नुम्च ॥ १०८ ॥

कृन्तत्रं लाङ्गलं ।

भृमृदृशियजिपर्विपच्यमितमिनमिहर्येभ्यो ऽतच् ॥ १०९ ॥

दृशभ्यो ऽतच् स्यात् भरतः । मरतो मृत्युः । दर्शतः सोमसूर्ययोः । यजत ऋत्विक् पर्वतः । पचतो ऽग्निः । अमतो रोगः । तमतस्तृष्णापरः । नमतः प्रह्वः । हर्यतो ऽश्वः ।

पृषिरञ्जिभ्यां कित् ॥ ११० ॥

पृषतो मृगो विन्दुश्च । रञ्जतं ।

खलतिः ॥ १११ ॥

स्खलतेः सलोपः । अतच्प्रत्ययान्तस्य इत्वं च । खलतिर्निष्केशशिराः ।

शीङ्शपिरुगमिवञ्चिनीविप्राणिभ्यो ऽथः ॥ ११२ ॥

सप्तभ्यो ऽथः स्यात् शयथो ऽजगरः । शपथः । रवथः कोकिलः । गमथः पथिकः पन्थाश्च । वञ्चथो धूर्तः । वन्दीति पाठे वन्दति वन्द्यते वा वन्दथः स्तोता स्तुत्यश्च । जीवथ आयुष्मान् । प्राणथो बलवान् बाङलकाच्छमिदमिभ्यां । शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः भृजञ्जित् ॥ ११३ ॥

भरथो लोकपालः ।

रुदिविदिभ्यां डित् ॥ ११४ ॥

रोदितीति रुदथः शिशुः । वेत्तीति विदथः ।

उपसर्गे वसेः ॥ ११५ ॥

आवसथो गृहं । संवसथो ग्रामः ।

अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमन्थिभ्यो ऽसच् ॥ ११६ ॥

त्रयोदशभ्यो ऽसच् स्यात् अततीत्यतसो वायुरात्मा च। अवतीत्यवसो राजा भानुश्च। चमत्यस्मिन् चमसः सोमपानपात्रं । ताम्यत्यस्मिन् तमसो ऽन्धकारः । नमस अनुकूलं । रभसो वेगहर्षयोः । लभसो धनं याचकश्च । नभति नभ्यति वा नभस आकाशः । तपसः पक्षी चन्द्रश्च । पतसः पक्षी । पनसः कण्टकफलं । पणसः पण्यद्रव्यं । मन्थसं ज्ञानं ।

वेजस्तुट् च ॥ ११७ ॥

बाङलकादात्वाभावः । वेतसः ।

वन्थियुभ्यां णित् ॥ ११८ ॥

वान्थसो ऽजगरः । यावसस्तृणसंघातः ।

वयश्च ॥ ११९ ॥

वय गतौ । वायसः काकः ।

दिवः कित् ॥ १२० ॥

दिवसं । दिवसः ।

कॄशॄशलिकलिगर्दिभ्यो ऽभच् ॥ १२१ ॥

करभः । शरभः । शलभः । कलभः । गर्दभः ।

ऋषिवृषिभ्यां कित् ॥ १२२ ॥

ऋषभः । वृषभः ।

रुषेर्निल्लुष्च ॥ १२३ ॥

रुष हिंसायां । अस्मादभच् नित्कित्स्यात् लुषादेशश्च । लुषभो मत्तदन्तिनि ।

रासिवल्लिभ्यां च ॥ १२४ ॥

रासभः । वल्लभः ।

जॄविशिभ्यां झच् ॥ १२५ ॥

जरन्तो महिषः । वेशन्तः पल्वलं ।

रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि ॥ १२६ ॥

रोहन्तो वृक्षभेदः। नन्दन्तः पुत्रः । जीवन्त औषधं । प्राणन्तो वायुः । षित्वान्ङीष् रोहन्ती ।

तॄभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च ॥ १२७ ॥

दशभ्यो झच् स्यात् स च षित् तरन्तः समुद्रः । तरन्ती नौका । भवन्तः कालः । वहन्तो वायुः ।

वसन्त ऋतुः । भासन्तः सूर्यः । साधन्तो भिक्षुः । गडेर्घटादित्वान्मित्वं ह्रस्वः । अयामन्तेति णेरयः ।

गडयन्तो जलदः । मण्डयन्तो भूषणं । जयन्तः शक्रपुत्रः । नन्दयन्तो नन्दकः ।

हन्तेर्मुट् हि च ॥ १२८ ॥

हेमन्तः ।

भन्देर्नलोपश्च ॥ १२९ ॥

भदन्तः प्रव्रजितः ।

ऋछेररः ॥ १३० ॥

ऋच्छरा वेश्या । बाहुलकाज्जर्जरकर्करादयः ।

अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चित् ॥ १३१ ॥

षड्भ्यो ऽरश्चित्स्यात् अररं कपाटं । कमरः कामुकः । भ्रमरः । चमरः । देवरः । वासरः ।

कुवः क्ररन् ॥ १३२ ॥

कुररः पक्षिभेदः ।

अङ्गिमदिमन्दिभ्य आरन् ॥ १३३ ॥

अङ्गारः । मदारो वराहः । मन्दारो देवतारुः ।

गडेः कड च ॥ १३४ ॥

कडारः ।

शृङ्गारभृङ्गारौ ॥ १३५ ॥

शृभृञ्भ्यामारन्नुम् गुक् ह्रस्वश्च । शृङ्गारो रसः । भृङ्गारः कनकालुका ।

कञ्जिमृजिभ्यां चित् ॥ १३६ ॥

कञ्जिः सौत्रः । कञ्जारो मयूरो । मार्जारः ।

कमेः किदुच्चोपधायाः ॥ १३७ ॥

चिदित्यनुवृत्तेरन्तोदात्तः । कुमारः ।

तुषारादयश्च ॥ १३८ ॥

तुषारः कासारश्च । सहार आम्रभेदः ।

दीङो नुट् च ॥ १३९ ॥

दीनारः सुवर्णाभरणं ।

सर्तेरपः षुक्च ॥ १४० ॥

सर्षपः ।

उषिकुटिदलिकचिखजिभ्यः कपन् ॥ १४१ ॥

उषपो वह्निसूर्ययोः । कुटपो मानभाण्डं । दलपः प्रहरणं । कचपं शाकपत्रं । खजपं घृतं ।

क्वणेः संप्रसारणं च ॥ १४२ ॥

कुणपं । कपश्चाक्रवर्मणस्य । स्वरे भेदः ।

विटपपिष्टपविशिपोलपाः ॥ १४३ ॥

चत्वारो ऽमी कपन्प्रत्ययान्ताः । विट शब्दे । विटपः । विशतेरादेः पः । प्रत्ययस्य तुट् षत्वं ।
पिष्टपं भुवनं । विशतेः प्रत्ययोदेरिवं । विशिपं मन्दिरं । वृतेः संप्रसारणं । उलपं कोमलं तृणं ।

वृतेस्तिकन् ॥ १४४ ॥

वर्त्तिका ।

कृतिभिदिलतिभ्यः कित् ॥ १४५ ॥

कृत्तिका । भित्तिका भित्तिः । लत्तिका गोधा ।

इष्यशिभ्यां तकन् ॥ १४६ ॥

इष्टका । अष्टका ।

इणस्तशत्तशसुनौ ॥ १४७ ॥

एतशो ब्राह्मणः । स एव एतशाः ।

वीपतिभ्यां तनन् ॥ १४८ ॥

वी गत्यादौ । वेतनं । पत्तनं ।

दृदृलिभ्यां भः ॥ १४९ ॥

दर्भः । दृल्भः स्यादृषिचक्रयोः ।

अर्तिगृभ्यां भन् ॥ १५० ॥

अर्भः । गर्भः ।

इणः कित् ॥ १५१ ॥

इभः ।

असिसञ्जिभ्यां क्थिन् ॥ १५२ ॥

अस्थि । सक्थि ।

प्लुषिकुषिप्रुषिभ्यः क्सिः ॥ १५३ ॥

प्लुक्षिर्वाङ्गः । कुक्षिः । प्रुक्षिर्वातः ।

अशेर्नित् ॥ १५४ ॥

अक्षि ।

इषेः क्सुः ॥ १५५ ॥

इक्षुः ।

अवितॄस्तृतन्त्रिभ्य ईः ॥ १५६ ॥

अवीर्नारी रजस्वला । तरीर्नौः । स्तरीर्धूमः । तन्त्रीर्वीणादेर्गुणः ।

यापोः किद्वे च ॥ १५७ ॥

ययीरश्वः । पपीः स्यात्सोमसूर्ययोः ।

लक्षेर्मुट् च ॥ १५८ ॥

लक्ष्मीः ।

॥ इत्युणादौ तृतीयः पादः ॥

Leghux.^1 205 / Bah. /

वातप्रमीः ॥ १ ॥

वातशब्द उपपदे माधातोरीप्प्रत्ययः स च कित् वातप्रमीः । अयं स्त्रीपुंसयोः ।

ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः कत्निच्यतुजलिजिष्ठुजिष्ठजिसन्स्यन्निथिन्नुत्त्यसासानुकः ॥ २ ॥

द्वादशभ्यः क्रमात्स्युः । अर्तेः कत्निच् यण् बद्धमुष्टिः करा रत्निः सोऽरत्निः प्रसृताङ्गुलिः । तनोतेर्यतुच् तन्यतुर्वायू रात्रिश्च । अञ्जेरलिच् अञ्जलिः । वनेरिष्ठुच् वनिष्ठुः स्थविरात्रं । अञ्जेरिष्ठच् अञ्जिष्ठो भानुः । अर्पयतेरिसन् अर्पिसो ऽग्रमांसं । मदेः स्यन् मत्स्यः । अतेरिथिन् अतिथिः । अङ्गेरुलिः । अङ्गुलिः । कौतेरसः । कवसः । अच इत्येके । कवचं । यौतेरासः । यवासो दुरालभा । कृशेरानुक् कृशानुः ।

श्रः करन् ॥ ३ ॥

उत्तरसूत्रे किद्ग्रहणादिह ककारस्य नेत्वं । शर्करा ।

पुषः कित् ॥ ४ ॥

पुष्करं ।

कलञ्च ॥ ५ ॥

पुष्कलं ।

गमेरिनिः ॥ ६ ॥

गमिष्यतीति गमी ।

आङि णित् ॥ ७ ॥

आगामी ।

भुवश्च ॥ ८ ॥

भावी ।

प्रे स्थः ॥ ९ ॥

प्रस्थायी ।

परमे कित् ॥ १० ॥

परमेष्ठी ।

मन्थः ॥ ११ ॥

मन्थतेरिनिः कित्स्यात् किच्चात्रकारलोपः । मन्थाः । मन्थानौ । मन्थानः ।

पतस्थ च ॥ १२ ॥

पन्थाः । पन्थानौ ।

खनेराकः ॥ १३ ॥

खनाकः पक्षी ।

वलाकादयश्च ॥ १४ ॥

वलाका । शलाका । पताका ।

पिनाकदयश्च ॥ १५ ॥

पातेरिवं नुम्च । क्लीवपुंसोः पिनाकः स्याच्छूलशङ्करधन्वनोः । तड आघाते । तडाकः ।

कषिहृषिभ्यामीकन् ॥ १६ ॥

कषीका पक्षिजातिः । दृषीका नेत्रयोर्मलं ।

अनिकृषिभ्यां किच्च ॥ १७ ॥

अनीकं । कृषीकं ।

चङ्कणः कङ्कण च ॥ १८ ॥

कण शब्दे । अस्माच्चङ्लुगन्तादीकन् धातोः कङ्कणादेशश्च । घण्टिकायां कङ्कणीका सैव प्रतिसरापि च ।

भृपृवृजां ह्रे रुक्चाभ्यासस्य ॥ १९ ॥

शर्शरीको हिंस्रः । पर्परीको दिवाकरः । वर्वरीकः कुटिलकेशः ।

पर्फरीकादयश्च ॥ २० ॥

स्फुर स्फुरणे । अस्मादीकन् धातोः पर्फरादेशः । पर्फरीकं किसलयं । दर्दरीकं वाद्यित्रं । कर्करीकं शरीरं । तिन्तिडीको वृक्षभेदः । चेरेर्नुम्च । चञ्चरीको भ्रमरः । मर्मरीको हीनजनः । कर्करीका गलन्तिका । पुण्डेः पुण्डरीकं वाद्यित्रं । पुण्डरीको व्याघ्रो ऽग्निर्दिग्गजश्च ।

ईषिः किद्वस्वश्च ॥ २१ ॥

इषीका शलाका ।

ऋज्रेश्च ॥ २२ ॥

ऋज्रीक उपस्कृतः ।

सर्तेर्नुम्च ॥ २३ ॥

सृणीका लाला ।

मृडः कीकन्कङ्कणौ ॥ २४ ॥

मृडीको मृगः । मृडङ्कणः शिग्रुः ।

अलीकादयश्च ॥ २५ ॥

कीकन्ता निपात्यन्ते । अल भूषणादौ । अलीकं मिथ्या । विपूर्वाद्वलीकं विप्रियं खेदश्च । वलीकं पटलप्रान्त इत्यादि ।

